# অম্বাস্তোত্রং স্বামী বিবেকানন্দরচিতম্

{॥ অম্বাস্তোত্রং স্বামী বিবেকানন্দরচিতম্ ॥}

কা ত্বং শুভকরে সুখদুঃখহস্তে
আঘূর্ণিতং ভবজলং প্রবলোর্মিভঙ্গৈঃ ।
শাংতিং বিধাতুমিহ কিং বহুধা বিভগ্নাম্
মতঃ প্রযত্নপরমাসি সদৈব বিশ্বে ॥

সম্পাদযত্যবিরতং ত্ববিরামবৃতা
যা বৈ স্থিতা কৃতফলং ত্বকৃতস্য নেত্রী ।
সা মে ভবত্বনিদিনং বরদা ভবানী
জানাম্যহং ধ্রুবমিদং ধৃতকর্মপাশা ॥

কো বা ধর্মঃ কিমকৃতং ক্বঃ কপাললেখঃ
কিংবাদৃষ্টং ফলমিহাস্তি হি যাং বিনা ভোঃ ।
ইচ্ছাপাশৈর্নিযমিতা নিযমাঃ স্বতংত্রৈঃ
যস্যা নেত্রী ভবতি সা শরণং মমাদ্যা ॥

সন্তানযন্তি জলধিং জনিমৃত্যুজালম্
সম্ভাবযন্ত্যবিকৃতং বিকৃতং বিভগ্নম্ ।
যস্যা বিভূতয ইহামিতশক্তিপালাঃ
নাশ্রিত্য তাং বদ কুত শরণং ব্রজামঃ ॥

মিত্রে রিপৌ ত্ববিষমং তব পদ্মনেত্রম্
স্বস্থে দুঃস্থে ত্ববিতথং তব হস্তপাতঃ ।
মৃত্যুচ্ছায়া তব দয়া ত্বমৃতঞ্চ মাতঃ
মা মাং মুঞ্চন্তু পরমে শুভদৃষ্টয়স্তে ॥

ক্বাম্বা সর্বা ক্ব গণনং মম হীনবুদ্ধেঃ
ধত্তুং দোর্ভ্যামিব মতির্জগদেকধাত্রীম্ ।
শ্রীসঞ্চিন্ত্যং সুচরণমভয়পতিষ্ঠম্
সেবাসারৈরভিনুতং শরণং প্রপদ্যে ॥

যা মামা জন্ম বিনয়ত্যতিদুঃখমার্গৈঃ
আসংসিদ্ধেঃ স্বকলিতৈল্ললিতৈর্বিলাসৈঃ ।
যা মে বুদ্ধিং সুবিদধে সততং ধরণ্যম্
সাম্বা সর্বা মম গতিঃ সফলে ফলে বা ॥

Encoded and proofread by Sunder Hattangadi (sunderh at hotmail.com)

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Amba Stotram Lyrics in Bengali PDF
% File name : ambaastotram.itx
% Location : doc_devii
% Author : Swami Vivekananda
% Language : Sanskrit
% Subject : Religion
% Transliterated by : Sunder Hattangadi
% Proofread by : Sunder Hattangadi
% Latest update : Dec. 27, 1997
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website